पिण्डेनैवोदकेन वा" इति विवाहेऽप्युक्तम्। अत्र पुत्रिकायाः पार्वणे पिण्डोदकयोः सम्बन्धात् कन्यामात्रेऽपि तद्योग्यतायाः सत्त्वात्। कन्या पिण्डोदकसम्बन्धोच्यते एतदनुसारादपि तस्याः सपिण्डता बोद्धव्या तस्मादेकपिण्डस्वधानामित्यनेन समानोदकभावः समाख्यातः न तु दशमपर्य्यन्तं, पित्रादिजीवनादिना सापिण्ड्यसम्बन्धेऽपि सापिण्ड्यं विहितं प्रागुक्तयुक्तेः स्वधेत्यस्य तदनुप्रयुक्तत्वेन वैयर्थ्यापत्तेः। अपुत्रधनाधिकारस्तु सन्निहिततराभावे सप्तमपुरुषपर्य्यन्तं मृतपितृकस्य स्वधोपलक्षितश्राद्धाधिकारः पुरुषत्रयपर्य्यन्तमिति अत्र स्वधाशब्दो मन्त्रपरः पितृभक्ष्यपरोऽपि। तथा च गुणविष्णुधृता श्रुतिः "स्वधा वै पितॄणामन्नमिति।" दशमपुरुषपर्य्यन्तं समानोदकत्वेऽपि न त्रिरात्रं किन्तु पक्षिण्यादि तथाहि उदकक्रियामधिकृत्य पारस्करः "सर्व्वे ज्ञातयो भावयन्ति आसप्तमाद्दशमाद्वा समानग्रामवासेन यावत् सम्बन्धमनुस्मरेयुर्वा" इति भावयन्ति निष्पादयन्ति अत्र यावत्सम्बन्धमनुस्मरेयुरेककुलजातावयमिति स्मरणं भवतीत्यनेनैव सर्व्वेषामुदकदाने प्राप्ते यदु आसप्तमाद्दशमादित्युक्तं तत्सन्निकर्षतारतम्येनाशौचभेदेऽप्युदककर्म्मसमानार्थमिति। अशौचभेदस्तु सप्तमपर्य्यन्तं सपिण्डत्वाद्दशाहः। ततश्च दशमपुरुषपर्य्यन्तं त्र्यहः। तथाच विष्णुबृहस्पती। "दशाहेन सपिण्डास्तु शुध्यन्ति मृतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः।" ततश्चतुर्दशपुरुषपर्य्यन्तं पक्षिणी ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः। तथाच मिताक्षराविवादचिन्तामण्योर्मनुः। "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु निवर्त्तेताचतुर्द्दशात्। जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते।" अत्र समानोदकत्वे द्विविधे पूर्व्वत्र गोतमः "पक्षिणीमसपिण्डे" परत्र हारीतः। "मातामहे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके" इति। अत्रैव गोत्रजानामहः स्मृतमिति जावालवचनं ततः परं सर्व्वथा समानोदकतानिवृत्तेः। स्नानमात्रमिति "स्नात्वा शुद्ध्यन्ति गोत्रजाः" इति बृहस्पत्युक्तत्वादिति"।

तथा च गोत्रैक्ये सति पिण्डलेपयोर्दातृत्वभोक्तृत्वान्यतरवत्त्वम् अशौचसापिण्ड्यम्। साक्षात्परम्परया सप्तमपर्य्यन्तदेहसम्बन्धवत्त्वं विवाहसापिण्ड्यं त्रिपुरुषपर्य्यन्तं देयपिण्डदातृत्वभोक्तृत्वान्यतरवत्त्वं दायग्रहणे सापिण्ड्यमिति विवेकः मिता० मातृसपत्न्या अपि सापिण्ड्यं स्वीकृत्य धनाधिकारोऽभिहितः तन्मते समानदेहसम्बन्धयोग्यतयैव सापिण्ड्यात्। दायभागमते तु श्राद्धे देयपिण्डदातृत्वभोक्तृत्वाभावात् न तस्याः सापिण्ड्यं तद्योग्यत्वेऽपि स्त्रीमात्रस्य विशेषवचनाभावे धनाधिकारपर्युदासात् इति विवेकः एवं स्नुषाया अपि॥

**सपिण्डीकरण** न० सह पिण्डेन सपिण्डः ततः अभूततद्भावे च्वि+कृ-ल्युट्। प्रेतत्वविमोचनाय प्रेतोद्देशेन कर्त्तव्ये पित्रादिपिण्डसमन्वयकरणरूपे श्राद्धभेदे

सपिण्डीकरणप्रकारस्तत्कालादकं श्रा०त० निरूपितं यथा "अथ सपिण्डीकरणम्। तत्र गोभिलः "पूर्णे संवत्सरे षण्मासे त्रिपक्षे यदहर्वा वृद्धिरापद्येत तदहश्चत्वार्युदकपात्राणि सतिलगन्धपुष्पोदकानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति। ये समानाः समनसः पितरो यमराज्ये तेषां लोकाः स्वधा नमो यज्ञो देवेषु कल्पताम्। ये समानाः समनसो जीवाजीवेषु मामकाः। तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समाः" इति एतेनैव पिण्डो व्याख्यातः" इति। पूर्णे संवत्सरे इति मुख्यः कल्पः। तदशक्तौ नवमो मासः "संवत्सरान्ते विजर्जनं नवममास्यमित्येके" इति पैठीनसिवचनात्। तदशक्तौ षष्ठो मासः। तत्राप्यशक्तौ त्रिपक्षः तत्राप्यशक्तौ अशौचापगमे प्रथममासस्य द्वादशभिर्दिनैर्द्वादशमासिकानि श्राद्धानि निर्वर्त्त्य त्रयोदशाहः सपिण्डीकरणकालः शूद्रस्य द्वादशाहो न तु त्रयोदशाह एव "मासिकार्थवत् द्वादशाहश्राद्धं कृत्वा त्रयोदशेऽह्नि वा तत्कुर्य्यान्मन्त्रवर्जं हि शूद्राणां द्वादशेऽह्नीति" विष्णुवचनात्। मासिकार्थवदिति मासिकार्थो मासि मासि क्रियमाणश्राद्धप्रयोजनं प्रेताप्यायनादि तद्युक्तं द्वादशाहक्रियमाणश्राद्धमित्यर्थः। यत्र त्वेकादशमासाभ्यन्तरेऽधिमासपातस्तत्र त्रयोदशसु दिनेषु त्रयोदश मासिकानि कृत्वा चतुर्दशेऽह्नि सपिण्डनं कार्य्यमिति "संवत्सराभ्यन्तरे यद्यधिमासो भवति तदा मासिकार्थं दिनमेकं वर्द्धयेत्" इति विष्णुवाक्यात् शूद्रस्य त्रयोदश दिनेषु त्रयोदश मासिकानि त्रयोदशेऽह्नि सपिण्डनं दृष्टपरिकल्पनान्यायात्। एवञ्च वृद्धिमात्रे न दिनवृद्धिरिति मिश्रोक्तं हेयम्। तद्धृतविष्णुसूत्रे दिनमेकं वर्द्धयेदिति स्मृतेः। श्राद्धाधिक्यमाह सत्यव्रतः "संवत्सरस्य मध्ये तु यदि स्यादधिमासकः